ण्टा तु पूगः क्रमुको गुवाकः खपुरोऽस्य तु। फलमुद्वेगमेते च हिन्तालसहितास्त्रयः॥ खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः॥ इति श्रीमदमरसिंहकृतौ नामलिङ्गानुशासने नाम वनौष
धीवर्गः॥ ॥ सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केशरी हरिः। शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः॥ वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः। दंष्ट्री घोणी स्तब्धरोमा
क्रोडो भूदार इत्यपि॥ कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः। मर्कटो वानरः कीशो वनौकाः अथ भल्लुके॥ ऋक्षाच्छभल्लभल्लूका गण्डके खड्गखड्गिनौ। लुलायो महिषो वाहद्विष
त्कासरसैरिभाः॥ स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः॥ शृगालवञ्चुकक्रोष्टुफेरुफेरवजम्बुकाः॥ ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक्। त्रयो गौधेरगौधारगौ
धेया गोधिकात्मजे॥ श्वावित्तु शल्यस्तल्लोम्नि शललं शलली शलं। वातप्रमीर्वातमृगः कोकस्त्वीहामृगो वृकः। मृगे कुरङ्गवातायुहरिणाजिनयोनयः। ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु। कदली

कदलीचीन चमूरुप्रियकावपि । समूरुश्चेति हरिणा अमी अजिनयोनयः ॥ कृष्णसारो रुरुन्यङ्कुरङ्कुशम्बररौहिषाः । गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः ॥ गन्धर्वः शरभो रामः सृमर
गवयः शशः । इत्यादयो मृगेन्द्राद्या गवाद्याः पशुजातयः ॥ उन्दुरुर्मूषिका घास्वगिरिका बालमूषिका । छुछुन्दरी गन्धमुखी दीर्घपुच्छी दिवान्धका ॥ सरटः कृकलासस्स्यान्मुसली
द गृहगोधिका ॥ लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः । नीलङ्गुस्तु कृमिः कर्णजलौका शतपद्युभे । वृश्चिकः शूककीटः स्यादलिद्रुणौ तु वृश्चिके । पारावतः कलरवः २३
कपोतोथ शशादनः ॥ पत्री श्येन उलूकस्तु वायसारातिपेचकौ । व्याघ्राटः स्याद्भरद्वाजः खञ्जरीटस्तु खञ्जनः ॥ लोहपृष्ठस्तु कङ्कः स्यादथ चाषः किकीदिविः । कलिङ्गभृङ्ग
धूम्याटा अथ स्याच्छतपत्रकः । दार्वाघाटोथ सारङ्गस्तोककौ चातकः समौ । कृकवाकुः स्तामचूडः कुक्कुटश्चरणायुधः । चटकः कलविङ्कः स्यात्तस्य स्त्री चटका नयाः । पुमपत्ये
चाटकैरः स्त्र्यपत्ये चटकैव हि । कर्करेटुः करटुः स्यात् कृकणक्रकरौ समौ ॥ वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥ काकस्तु करटारिष्टबलिपुष्टसकृत्प्रजाः । ध्वाङ्क्षात्मघोष

परभृद्बलिभुग्वायसा अपि । द्रोणकाकस्तु काकोलो दात्यूहः कालकण्ठकः ॥ आतापिचिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ समौ । क्रुङ्क्रौञ्चोथ बकः कह्वः पुष्कराह्वस्तु सारसः । कोकश्चक्रश्चक्रवा
को रथाङ्गाह्वयनामकः ॥ कादम्बः कलहंसः स्यादुत्क्रोशकुररौ समौ ॥ हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः । राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः । मलिनैर्मल्लिकाक्षा
स्ते धार्त्तराष्ट्राः सितेतरैः ॥ शरारिराटिराडिश्च बलाका बिसकण्ठिका । हंसस्य योषिद्वरटा सारसस्य तु लक्ष्मणा । जतुकाजिनपत्रा स्यात्परोष्णी तैलपायिका । वर्वणा मक्षिका नी
ला सरघा मधुमक्षिका । पतङ्गिका पुत्तिका स्याद्दंशस्तु वनमक्षिका । दंशी तज्जातिरल्पा स्याद्गन्धोली वरटा द्वयोः । भृङ्गारी झीरुका चीरी झिल्लिका च समा इमाः । समौ पतङ्गशल
भौ खद्योतो ज्योतिरिङ्गणः ॥ मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ॥ द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥ मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् । शिखावलः शिखी के
की मेघनादानुलास्यपि । केकावाणी मयूरस्य समौ चन्द्रकमेचकौ । शिखा चूडा शिखण्डस्तु पिच्छबर्हे नपुंसके । खगे विहङ्गविहगविहङ्गमविहायसः । शकुन्तिपक्षिशकुनिशकुन्त

पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः ॥ नगौको वाजिविकिरविविष्किरपतत्रयः ॥ नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसङ्गमाः ॥ तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ॥
तित्तिरिः कुक्कुभो लावा जीवञ्जीवश्चकोरकः ॥ कोयष्टिकष्टिट्टिभको वर्तको वर्ति   कादयः ॥ गरुच्छदाः पत्रं पतत्रञ्च तनूरुहं ॥ स्त्री पक्षतिः पक्षमूलं चञ्चुस्त्रोटिरुभे स्त्रियौ ॥
नि   प्रडीनोड्डीनसंडीना खगानाङ्गतिक्रिया ॥ पेशी कोशो द्विहीनेऽण्डं कुलायो   नीडमस्त्रियां ॥ पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ॥ स्त्रीपुंसौ मिथुनं द्वन्द्वं युग्मन्तु   २५
युगलं युगं ॥ समूहो निवहव्यूहसन्दोहविसरव्रजाः ॥ स्तोमौघनिकरव्रातवार   संघातसञ्चयाः ॥ समुदायः समुदयः समवायश्चयो गणः ॥ स्त्रियान्तु संहतिर्वृन्दं निकुरम्बक
दम्बकं ॥ वृन्दभेदाः समैर्वर्गः संघसार्थौ तु जन्तुभिः ॥ सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकं ॥ पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणां ॥ स्यान्निकायः पुञ्जराशी तूत्करः कूटमस्त्रि

यां ॥ कपोतपालिकायान्तु विटङ्कं पुंनपुंसकं ॥ ... ॥ इत्यमरसिंहकृतौ नामलिङ्गानुशासने सिंहादिवर्गः ॥ ५ ॥ मनुष्या मानुषा
मर्त्या मनुजा मानवा नराः ॥ स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः   ॥ स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ॥ प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ विशेषास्त्वङ्गना
भीरुः कामिनी वामलोचना ॥ प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ सुन्दरी र   मणी रामा कोपना सैव भामिनी ॥ वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ कृताभिषेका महिषी भोगि
न्योऽन्याः नृपस्त्रियः ॥ पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ भार्या जायाथ पुंभूम्नि   दाराः स्यात्तु कुटुम्बिनी ॥ पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता ॥ कृतसापत्निकाध्यूढाधिविन्नाथ स्वयं
वरा ॥ पतिंवरा च वर्याथ कुलस्त्री कुलपालिका ॥ कन्या कुमारी गौरी तु नग्निकानागता   र्त्तवा ॥ स्यान्मध्यमा दृष्टरजास्तरुणी युवती समे ॥ समाः स्नुषाजनीवध्वश्चिरिण्टी तु सुवासिनी ॥ इच्छावती कामु
का स्याद्वृषस्यन्ती तु कामुकी ॥ कान्तार्थिनी तु या याति सङ्केतं साभिसारिका ॥ पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी ॥ स्वैरिणी पांशुला च स्यादशिश्वी शिशुना विना ॥ अवीरा निष्पतिसुता विश्वस्ताविधवे समे ॥

आली सखी वयस्याथ पतिवत्नी सभर्तृका। वृद्धा पलिक्नी प्राज्ञी तु प्रज्ञा प्राज्ञा तु धीमती। शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च। आभीरी तु महाशूद्री जातिपुंयोगयोः समा। अर्याणी स्वय
मर्या स्यात्क्षत्रिया क्षत्रियाण्यपि॥ उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः। आचार्याणी तु पुंयोगे स्यादर्यी क्षत्रियी तथा। उपाध्यायान्युपाध्यायी पोटा स्त्रीपुंसलक्षणा।
वीरपत्नी वीरभार्या वीरमाता तु वीरसूः। जातापत्या प्रजाता च प्रसूता च प्रसूतिका। स्त्री नग्निका कोटवी स्याद्दूती संचारिके समे। कात्यायन्यर्द्धवृद्धा या काषायवसनाधवा।
सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका। असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी॥ वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनैः। सत्कृता वारमुख्या स्यात् कुट्टनी शम्भली २७
समे॥ विप्रश्निका त्वीक्षणिका दैवज्ञाथ रजस्वला। स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि॥ ऋतुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्त्तवं। श्रद्धालुर्दोहदवती निःकला विगतार्त्तवा।
आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी। गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे। पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः। स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी। कानीनः

कन्यकाजातः सुतोऽथ सुभगासुतः। सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रियाः। पैतृष्वस्रीयः स्यात्पैतृष्वस्रीयः पितृष्वसुः। सुता मातृष्वसुश्चैव वैमात्रेयो विमातृजः। अथ बान्धकिनेयः स्याद्बन्धुलश्चा
सतीसुतः। कौलटेयः कौलटेरो भिक्षुकी तु सती यदि॥ तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः। आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे।
स्वजाते त्वौरसोरस्यौ तातस्तु जनकः पिता॥ जनयित्री प्रसूर्माता जननी भगिनी स्वसा। ननान्दा तु स्वसा पत्युर्नप्ती पौत्री सुतात्मजा। भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परं॥ प्रजावती
भ्रातृजाया मातुलानी तु मातुली। पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः॥ पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः। श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ॥ स्वस्री
यो भागिनेयः स्याज्जामाता दुहितुः पतिः॥ सगोत्रबान्धवज्ञाति बन्धुस्वस्वजनाः समाः। ज्ञातेयं बन्धुता तेषां क्रमाद्भावसमूहयोः। धवः प्रियः पतिर्भर्ता जारस्तूपपतिः समौ। अमृते जारजः कुण्डो
मृते भर्त्तरि गोलकः। भ्रात्रीयो भ्रातृजो भ्रातृभगिन्यौ भ्रातरावुभौ। मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ॥ श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहिता च॥ दम्पती जम्पती भार्यापती जायापती च तौ।

गर्भाशयो जरायुः स्यादुल्वं च कललोऽस्त्रियां ॥ सूतिमासौ वैजननो गर्भो भ्रूण इमौ समौ । तृतीया प्रकृतिः शण्ढः क्लीबः पण्डो नपुंसकं । शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे । स्यात्स्थाविरन्तु वृद्धत्वं वृद्ध
संघेऽपि वार्द्धकं । पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा । स्यादुत्तानशया डिम्भा स्त
नपा च स्तनन्धयी ॥ बालस्तु स्यान्माणवको वयस्थस्तरुणो युवा । प्रवयाः स्थविरो वृद्धो जीनो जीर्णो
मं जरन्नपि ॥ वर्षीयान्दशमी ज्यायान् पूर्वजस्त्वग्रियोऽग्रजः । जघन्यजे स्युः कनिष्ठ
यवीयोऽवरजानुजाः । अमांसो दुर्बलश्छातो बलवान्मांसलोंऽसलः । तुन्दिलस्तुन्दिकस्तुन्दी बृह २६
त्कुक्षिः पिचण्डिलः । अवटीटोऽवनाटश्चावभ्रटो नतनासिके । केशवः केशिकः केशी
वलिनो वलिभः समौ । विकलाङ्गस्त्वपोगण्डः खर्वो ह्रस्वश्च वामनः । खरणाः स्यात्खरणसो विग्रस्तु गत
नासिकः । खुरणाः स्यात्खुरणसः प्रज्ञुः प्रगतजानुकः । ऊर्द्ध्वज्ञुरूर्द्ध्वजानुः स्यात्संज्ञुः
संहतजानुकः । स्यादेडे बधिरः कुब्जे गडुलः कुकरः कुणिः । पृश्निरल्पतनौ श्रोणः पङ्गौ मुण्डस्तु मुण्डि
ते । वलिरः केकरस्यात् खञ्जस्त्रिषु जरावराः । जटिलः कालकः पिप्लु तिलकस्तिलकालकः । अनामयं स्यादारोग्यं चिकित्सा रुक्प्रतिक्रिया । भेषजौषधभैषज्यान्यगदो जायुरित्यपि । स्त्री रुग्रुजा

चोपतापरोगव्याधिगदामयाः । क्षयः शोषश्च यक्ष्मा च प्रतिश्यायस्तु पीनसः । स्त्री क्षुत् क्षुतं क्षवः पुंसि कासस्तु क्षवथुः पुमान् ॥ शोफस्तु श्वयथुः शोथः पादस्फोटो विपादिका । किलास
सिध्मे कच्छ्वान्तु पामपामा विचर्चिका । कण्डूः खर्जूश्च कण्डूया विस्फोटः पिटकः स्त्रियां ।
व्रणोऽस्त्रियामीर्मरुः क्लीबे नाडीव्रणः पुमान् । कोठो मण्डलकं कुष्ठं श्वित्रे दुर्नामकार्शसी ।
अनाहस्तु विबन्धः स्याद्ग्रहणी रुक् प्रवाहिका । प्रच्छर्दिका वमिश्च स्त्री पुमां
स्तु वमथुः समाः । व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगन्दराः । अश्मरी मूत्रकृच्छ्रं स्या
त्पूर्वे शुक्रावधेस्त्रिषु । रोगहार्यगदङ्कारो भिषग्वैद्यौ चिकित्सके । वार्त्तो नि
रामयः कल्य उल्लाघो निर्गतो गदात् ॥ ग्लानग्लास्नू आमयावी विकृतो व्याधितोऽपटुः ।
आतुरोऽभ्यमितोऽभ्यान्तः समौ पामनकच्छुरौ ॥ दद्रूणो दद्रुरोगी स्यादर्शोरो
गयुतोऽर्शसः ॥ वातकी वातरोगी स्यात् सातिसारोऽतिसारकी । स्युः क्लिन्नाक्षे चुल्लचि
ल्लपिल्लाः क्लिन्नेऽक्षिण चाप्यमी । उन्मत्त उन्मादवति श्लेष्मलः श्लेष्मणः कफी । न्युब्जो भुग्ने रुजा वृद्धनाभौ तुण्डिलतुण्डिभौ ॥ किलासी सिध्मलोऽन्धोऽदृङ् मूर्च्छाले मूर्त्तमूर्च्छितौ । शुक्रं

जोरेतसी च बीजवीर्येन्द्रियाणि च । मायुः पित्तं कफः श्लेष्मा स्त्रियान्तु त्वगसृग्धरा । पिशितं तरसं मांसं पललं क्रव्यमामिषं । उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकं । रुधिरेऽसृग्लोहितास्ररक्त

प्र क्षतजशोणितं ॥ बुक्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा । पश्चाद्ग्रीवाशिरा मन्या नाडी तु धमनी शिरा ॥ तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियां । अन्त्रं पुरीतद्गुल्मस्तु

प्लीहा पुंस्यथ वस्नसा । स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे । सृणिका स्य न्दिनी लाला दूषिका नेत्रयोर्मलं । मूत्रं प्रस्रावः उच्चारावस्करौ शमलं शकृत् । पुरीषं गूथवर्चस्क २१

मस्त्री विष्ठाविषे स्त्रियौ । स्यात्कर्परः कपालोऽस्त्री कीकसं कुल्यमस्थि च । स्यात्शरीरास्थ्नि कङ्कालः पृष्ठास्थ्नि तु कशेरुका । शिरोऽस्थनि करोटिः स्त्री पार्श्वास्थनि तु पर्शुका । अङ्गं प्रतीकोऽवयवो

ऽपघनोऽथ कलेवरं । गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः । कायो देहः क्लीबपुंसोः स्त्रियां मूर्त्तिस्तनुस्तनूः । पादाग्रं प्रपदं पादः पदङ्घ्रिश्चरणोऽस्त्रियाः ॥ तद्ग्रन्थी घुटिके गुल्फौ पु

मान्पार्ष्णिस्तयोरधः । जङ्घा तु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियां । सक्थि क्लीबे पुमानूरुस्तत्सन्धिः पुंसि वङ्क्षणः । गुदं त्वपानं पायुर्ना बस्तिर्नाभेरधो द्वयोः ॥ कटो ना श्रोणिफलकं कटिः श्रो

णिः ककुद्मती । पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः । कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे । स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः । भगं योनिर्द्वयोः शिश्नो

मेढ्रो मेहनशेफसी । मुष्कोऽण्डकोशो वृषणः पृष्ठवंशाधरे त्रिकं । पिचिण्डकुक्षी जठरो दरं तुन्दं स्तनौ कुचौ । चूचुकन्तु कुचाग्रं स्यान्न ना क्रोडं भुजान्तरं ॥ उरो वत्सञ्च वक्षश्च पृष्ठन्तु

चरमं तनोः । स्कन्धो भुजशिरोंसोऽस्त्री सन्धी तस्यैव जत्रुणी । बाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः । मध्यमं चावलग्नञ्च मध्योऽस्त्री द्वौ परौ द्वयोः । भुजबाहू प्रवेष्टो दो

ः स्यात्कफोणिस्तु कूर्परः ॥ अस्योपरि प्रगण्डः स्यात्प्रकोष्ठस्तस्य चाप्यधः ॥ मणिबन्धादाकनिष्ठं करस्य करभो बहिः । पञ्चशाखः शयः पाणिस्तर्जनी स्यात्प्रदेशिनी ।

अङ्गुल्यः करशाखाः स्युः पुंस्यङ्गुष्ठः प्रदेशिनी । मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ॥ पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियां ॥ प्रादेशतालगोकर्णास्तर्जन्या

दियुते तते ॥ अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः । पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ॥ द्वौ संहतौ संहततलप्रतलौ वामदक्षिणौ । पाणिर्निकुब्जः प्रसृतिस्त्यु

धा तावञ्जलिः पुमान् ॥ प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्या तु बद्धया । स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥ व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरं । ऊर्ध्वविस्तृतदोःपाणिनृमा-
ने पौरुषं त्रिषु ॥ कण्ठो गलोऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि । कम्बुग्रीवा त्रिरेखा सावटुर्घाटा कृकाटिका ॥ वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखं । क्लीबे घ्राणं गन्धवहा घोणा
नासा च नासिका । ओष्ठाधरौ तु रदनच्छदौ दशनवाससी । अधस्ताच्चिबुकं गण्डौ कपोलौ तत्परो हनुः ॥ रदना दशना दन्ता रदास्तालु तु काकुदं । रसज्ञा रसना जिह्वा प्रान्ताव- २८
ोष्ठस्य सृक्किणी । ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ॥ कूर्चमस्त्री भ्रुवोर्मध्यं तारकाक्ष्णः कनीनिका ॥ लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी । दृग्दृष्टी चास्रु नेत्राम्बु रोद-
नं चास्रमश्रु च । अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने ॥ कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः । उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियां । चिकुरः कुन्तलो वाल
ः कचः केशः शिरोरुहः ॥ तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः । ते ललाटे भ्रमरकाः काकपक्षः शिखण्डकः । कबरी केशवेशोऽथ धम्मिल्लः संयताः कचाः । शिखा चूडा केशपाशी

व्रतिनस्तु सटा जटा ॥ वेणिः प्रवेणिः शीर्षण्यशिरस्यौ विशदे कचे । पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥ तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुंमुखे । आकल्पवेषौ नेपथ्यं प्रतिक-
र्म प्रसाधनं ॥ दशैते त्रिष्वलंकर्तालंकरिष्णुश्च मण्डितः । प्रसाधितोऽलंकृतश्च भूषितश्च परिष्कृतः ॥ विभ्राड् भ्राजिष्णुरोचिष्णू भूषणं स्यादलंक्रिया । अलंकारस्त्वाभरणं परि-
ष्कारो विभूषणं ॥ मण्डनं चाथ मुकुटं किरीटं पुन्नपुंसकं । चूडामणिः शिरोरत्नं तरलो हारमध्यगः ॥ वालपाश्या पारितथ्या पत्रपाश्या ललाटिका । कर्णिका ताल-
पत्रं स्यात्कुण्डलं कर्णवेष्टनं ॥ ग्रैवेयकं कण्ठभूषा लम्बनं स्याल्ललन्तिका । स्वर्णैः प्रालम्बिकाथोरःसूत्रिका मौक्तिकैः कृता । हारो मुक्तावली देवच्छन्दोऽसौ शतयष्टि-
का ॥ हारभेदा यष्टिभेदाद्गुच्छगुच्छार्धगोस्तनाः । अर्धहारो माणवक एकावल्येकयष्टिका ॥ सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः । आवापकः पारिहार्यः कटकं वलयोऽ-
स्त्रियां ॥ केयूरमङ्गदं तुल्ये अङ्गुलीयकमूर्मिका । साक्षराङ्गुलिमुद्रा स्यात् कङ्कणं करभूषणं । स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा । क्लीबे सारसनं चाथ पुंस्कट्यां शृङ्खलं त्रि

त्रिषु ॥ पादाङ्गदं तुलाकोटि मंजीरो नूपुरो ऽस्त्रियां । हंसकः पादकटकः किंकिणी क्षुद्रघण्टिका । त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषुः । वाल्कं क्षौमादि फालं तु कार्पासं बादरं च य
त् ॥ कौशेयं कृमिकोशोत्थं राङ्कवं मृगरोमजं । अनाहतं निष्प्रवाणि तन्त्रकं च नव वाम्बरं ॥ तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगं ॥ पत्रोर्णं धौतकौशेयं बहुमूल्यं मह
मं धनं ॥ क्षौमं दुकूलं स्याद्द्वे तु निवीतं प्रावृतं त्रिषु । स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयोर्द्वयोः । दैर्घ्यमायाममारोहः परिणाहो विशालता । पटच्चरं जीर्णवस्त्रं समौ नक्त २९
कर्पटौ । वस्त्रमाच्छादनं वासः चैलं वसनमंशुकं ॥ सुचेलकः पटोऽस्त्री स्याद्वराशिः स्थूलशाटकः । निचोलः प्रच्छदपटः समौ उल्लककम्बलौ । अन्तरीयोपसंव्यान परि
धानान्यधोंशुके । द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा । संव्यानमुत्तरीयं च चोलः कूर्पासकः स्त्रियां । निशारः स्यात्प्रावरणे हिमानिलनिवारणे । अर्द्धोरुकं वरस्त्रीणां ॰

स्याच्चण्डातकमंशुकं ॥ स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् । अस्त्री वितानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि । प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा । परिकर्माङ्गसंस्कारः स्यान्मार्ष्टिर्मा
र्जना मृजा । उद्वर्तनोत्सादने द्वे समे आप्लाव आप्लवः । स्नानं चर्चा तु चार्चिक्यं स्थासकः । प्रबोधनः । अनुबोधः पत्रलेखा पत्राङ्गुलिरिमे समे । तमालपत्रतिलकचित्रकाणि विशेषकं ।
द्वितीयं च तुरीयं च न स्त्रियामथ कुङ्कुमं । काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतनं । रक्तसंकोचपिशुनं धीरं लोहितचन्दनं । लाक्षा राक्षा जतु क्लीबे यावो ऽलक्तो द्रुमामयः । लव
ङ्गं देवकुसुमं श्रीसंज्ञमथ जायकं । कालीयकं च कालानुसार्यं चाथ समार्थकं । वंशिका गुरु राजार्हलोहकृमिजजोङ्गकं । कालागुर्वगुरुः स्यात्तु मङ्गल्या मल्लिगन्धि यत् । यक्ष
धूपः सर्जरसो रालः सर्वरसावपि । बहुरूपोऽप्यथ वृकधूपकृत्रिमधूपकौ । तुरुष्कः पिण्डकः सिह्लो यावनोऽप्यथ पायसः । श्रीवासो वृकधूपोऽपि श्रीवेष्टसरलद्रवौ । मृग
नाभिर्मृगमदः कस्तूरी चाथ कोलकं । कक्कोलकं कोशफलमथ कर्पूरमस्त्रियां । घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका । गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियां । तैलपर्णिकगोशी

ष. कनिवद्धनमस्त्रियां ॥ तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनं । कुचन्दनञ्चाथ जातीकोशजातीफले समम । कर्पूरागुरुकस्तूरी कक्कोलैर्यक्षकर्दमः । गात्रानुलेपनी वर्त्तिर्व्वर्णकं स्याद्विलेप
नं ॥ चूर्णानि वासयोगाः स्युर्भावितं वासितं त्रिषु । संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधि वासनं ॥ माल्यं माला स्रजा मूर्द्ध्नि केशमध्ये तु गर्भकः । प्रभ्रष्टकं शिखालम्बि पुरोन्यस्तं ललामकं ।
प्रालम्बमृजुलम्बि स्यात्कण्ठाद्वैकक्षिकन्तु तत् । यत्तिर्यक्क्षिप्तमुरसि शिखास्वा पीडशेखरौ । रचना स्यात्परिस्पन्दः आभोगः परिपूर्णता । उपधानन्तूपबर्हः शय्यायां शयनीय
वत् । शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः । गेण्डुकः कन्दुकः दीपः प्रदीपः पीठमासनं । समुद्गकः सम्पुटकः प्रतिग्राहः पतद्ग्रहः । प्रसाधनी कङ्कतिका पिष्टातः पट ३०
वासकः । दर्पणे मुकुरादर्शौ व्यजनं तालवृन्तकं ॥ ॥इति मनुष्यवर्गः ॥ ॥ सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ । वंशोऽन्ववायः स
न्ताना वर्णाः स्युर्ब्राह्मणादयः । राजबीजी राजवंश्यो बीज्यस्तु कुलसम्भवः ॥ महाकुलकुलीनार्यसभ्यसज्जनसाधवः । ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये । आश्रमोऽस्त्री द्विजात्यग्र जन्मभू

देवबाडवाः ॥ विप्रश्च ब्राह्मणोऽसौ षट्कर्मा यागादिभिर्युतः । विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः । धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः । धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो वि
चक्षणः । दूरदर्शी दीर्घदर्शी श्रोत्रियच्छान्दसौ समौ । उपाध्यायोऽध्यापकः स्यान्निषे कादिकृद्गुरुः ॥ मन्त्रव्याख्याकृदाचार्यः आदेष्टा त्वध्वरे व्रती । यष्टा च यजमानश्च स सोमवति दी
क्षितः ॥ इज्याशीलो यायजूको यज्वा तु विधिनेष्टवान् । स गीष्पतीष्ट्या स्थपतिः सोमपी थी तु सोमपाः । सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः । अनूचानः प्रवचने साङ्गे
ऽधीती गुरोस्तु यः ॥ लब्धानुज्ञः समावृत्तः सुत्वा त्वभिषवे कृते । छात्रान्तेवासिनौ शि ष्ये शैक्षाः प्राथमकल्पिकाः । एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः । सतीर्थ्यास्त्वेकगुरव
श्चितवानग्निमग्निचित् ॥ पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययं । उपज्ञा ज्ञानमाद्यं स्याज्ज्ञा त्वारम्भ उपक्रमः । यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः । पाठे होमश्चातिथी
नां सपर्या तर्पणं बलिः ॥ एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः । समज्या परिषद्गोष्ठी सभासमितिसंसदः । आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः । प्राग्वंशः प्राग्वि

नू मदस्याविधिदर्शिनः । सतामदः सतास्तुव । मस्यामामजिकाथ न । सूत्रयूपादि हीनाना । यज्ञः सामर्थ्यदः क्रमात् । अग्नी आज्य धनैर्द्वयो सन्निजा याजकाथ न । वदिः यविष्ठाना भूमिः समस्तुतिल
ववव । ववाप्यो सूत्रवाटकः कुम्भामृगकनाद्दति । सूत्रपर्थं तस्मिन्निर्मृष्ठा वानूनि त्वमूणि द्वयाः । दक्षिणाग्निपार्श्वयो कवनीयात्रयाग्न्यः । अग्नित्रयमिदं तारावर्णितः मस्का तानलः ।
समूकृयविवाथेषि । याथ्यविक्षेप्रयागिणः । यागार्कयस्याधानीय । दक्षिणाग्नि ःवणीयत । तस्मिन्ननाय्याथाग्नायी स्वाहावक्तृतुकृप्रिया । सकुमासिद्धेनी धाय्यादि याम्यावमि ३१
समिद्धन । गायत्री प्रमुखं स्तुत्या कथ्याकवनूः स्मृता । ऋमिद्धासाधृताश्च या वा मस्याद्विधियागतः । पूर्विर्यत्र्यंजनिताह्य दर्विनं सृगवेर्म्मण ॥ सूवेयाइर्मदश्चास्त्र यवमानानुया
यमे । रुद्यवथ देवपितृ गूनयार्णप्रवाधिर्वे । कृवायटहक्रतुर्माण प्रथारमा ध्रुवः स्त्रियः । उपात्तानिः यसुवसा यानिमन्त्रक्रमोक्तः । यतयनार्कस ममंयाद्भ्रण वर्णाथ
र्थवी ॥ वाय्यालिंगप्रमानाय संयवक्ष्याद्विनाकृत ॥ साग्नायर्षविवयोत्तु कृतिविद्यायवक्तुं ॥ दीक्षाणां स्वस्थ्योयक्त कृत्वामर्दिक्व यक्ष्मिय । विद्वयवत्तुवार्म्महं पूर्णस्वाणाधिकर्मणि ।

भूतस्तं विधमायक्ष । गैमसाजन गैमया । त्यागो विकाधिर्नवान मसक्तं नविसर्जनं । विप्रानन्नं विनवल्तं स्वर्गनिष्पादिवादन । सात्रगनीनिर्द्वयण मयवक्तं नसंकलिः । मृतार्थं नदरद्धानं त्रि
सुस्याथो द्वदिक्ते ॥ पितृयानमिवायस्या ह्याद्दं नकर्म्मणि । भूतः सूत्राकार्यं नामि कःसोः सूमाङ्कः कृतया क्रिया । पर्यसणे यथीच्छि सूत्रमणागमयणा । सनिभूद्ववणायाङ्गः
त्रिशक्रियोवनात्मना । सदूतिर्वृथा च सदो भेदाईयाद्यवाविनि । क्रमावादिथ्याति यथा प्रति थ्याथर्ण साधुनि । थ्याद्यवणिकभूमतु वनिथिर्नो गृहकागत । यूत्थानमस्यायविनिः सय
थ्यो द्विकिणासमाः । ववि वय्याद्गुगुणूम । यविवय्याद्यामनं प्रवृग्याद्यायर्यरनं वथाद्विथ्याय थक्ष्मिनिः । उपस्थ्यर्गक्षावमन सथमीनमराववणं । क्रातूद्दर्दीक्रियावाहूयवि
याटिवनू जमः । पय्यायशा निर्वान्तस्तु स्याद्यर्थायिउपाययः । नियमावनमदृ नद्वायवामाधिपूर्व्वर्वा । उपयर्कगृहयवाम विवकः पृथुगाग्निकाः । स्याद्भक्षवयर्थमङ्गताथ
यनद्विवथा गूरुलिः ॥ या ० व्रवक्ता द्वल्लिया ० विसूनवक्ष्माविन्दवः । ध्यानया [illegible] वक्ता सनकाल्यविधिक्रमो ॥ मृत्युसाप्यथमनाल्पोनूयान्यनुगताधमः । मस्कावयुद्ध्यिकर्णस्याद्धवा

श्री वर्ण्णं व्रतं ॥ समस्नुयादयस्कन्दमभिवादनमित्युभे । भिक्षुः परिव्राट् कर्म्मन्दी पाराशर्य्यपि मस्करी । तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः । तपःक्लेशसहो दान्तो वर्ण्णिनो ब्रह्मचारिणः । ऋषयः सत्यवच-
सः स्नातकस्त्वाप्लुतव्रती ॥ ये निर्ज्जितेन्द्रियग्रामा यतिनो यतयश्च ते । यः स्थण्डिले व्रतवशाच्छे- ते स्थण्डिलशाय्यसौ । स्थाण्डिलश्चाथ विरजस्तमसः स्युर्द्वयातिगाः । पवित्रः प्रयतः पूतः पाषण्डाः सर्व्वलि-
ङ्गिनः । पालाशो दण्ड आषाढो व्रते राम्भस्तु वैणवः । अस्त्री कमण्डलुः कुण्डी व्रतिनामासनं वृषी । अजिनं चर्म्म कृत्तिः स्त्री भैक्षं भिक्षाकदम्बकं । स्वाध्यायः स्याज्जपः सुत्याभिषवः सवनञ्च सा । सर्व्वै-
नसामपध्वंसि जप्यं त्रिष्वघमर्षणं । दर्शश्च पौर्ण्णमासश्च यागौ पक्षान्तयोः पृथक् । शरीरसाधनापेक्षं नित्यं यत्कर्म्म तद्यमः ॥ नियमस्तु स यत्कर्म्म नित्यमागन्तुसाधनं । उपवीतं यज्ञसूत्रं प्रो- ३२
द्धृते दक्षिणे करे ॥ प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितं । अङ्गुल्यग्रे तीर्थं दैवं स्व- ल्पाङ्गुल्योर्मूले कायं । मध्येऽङ्गुष्ठाङ्गुल्योः पित्र्यं मूले त्वङ्गुष्ठस्य ब्राह्मं । स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायु-
ज्यमित्यपि ॥ देवभूयादिकं तद्वत् कृच्छ्रं सान्तपनादिकं । सन्न्यासवत्यनशने पुमान्प्रायोऽथ वीरहा । नष्टाग्निः कुहना लोभान्मिथ्येर्यापथकल्पना । व्रात्यः संस्कारहीनः स्यादस्वाध्यायो निराकृतिः ॥

धर्म्मध्वजी लिङ्गवृत्तिरवकीर्ण्णी क्षतव्रतः । सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च । अंशुमानभिनिर्म्मुक्ताभ्युदितौ च यथाक्रमं ॥ परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात् । परिवित्तिस्तु तज्ज्याया-
न् विवाहोपयमौ समौ । तथा परिणयोद्वाहोपयामाः पाणिपीडनं । व्यवायो ग्राम्यध- र्म्मो मैथुनं निधुवनं रतं ॥ त्रिवर्ग्गो धर्म्मकामार्थैश्चतुर्वर्ग्गः समोक्षकैः । सबलैस्तैश्चतुर्भद्रं
जन्याः स्निग्धा वरस्य ये ॥ इत्यमरसिंहकृतौ नामलिङ्गानुशासने ब्रह्मवर्ग्गः ॥ ॥ मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् । राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ।
राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः । चक्रवर्त्ती सार्व्वभौमो नृपोऽन्यो मण्डलेश्व- रः । येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राजकं ।
राजन्यकञ्च नृपतिक्षत्रियाणां गणे क्रमात् । मन्त्री धीसचिवोऽमात्योऽन्ये कर्म्मसचिवास्ततः । महामात्राः प्रधानानि पुरोधास्तु पुरोहितः । द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ।

प्रतीहारो द्वाःस्थद्वाःस्थितदर्शकाः ॥ रक्षिवर्गस्त्वनीकस्थोऽथाध्यक्षाधिकृतौ समौ। स्थायुकोऽधिकृतो ग्रामे गोपो ग्रामेषु भूरिषु। भौरिकः कनकाध्यक्षो रूप्याध्यक्षस्तु नैष्किकः। अन्

ग तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः ॥ सौविदल्लाः कञ्चुकिनः स्थापत्याः सौ विदाश्च ते। षण्डो वर्षवरस्तुल्यौ सेवकार्थ्यनुजीविनः। विषयानन्तरो राजा शत्रुर्मित्रमतः

परं ॥ उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः। रिपौ वैरिसपत्नारिद्विषद्द्वे षणदुर्हृदः ॥ द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः। अभिघातिपरारातिप्रत्यर्थिपरिप

न्थिनः। वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत्। सख्यं साप्तपदीनं स्यादनु रोधोऽनुवर्तनं ॥ यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः। चारश्च गूढपुरुषश्चाप्तप्रत्य ३३

यितौ समौ। सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि ॥ स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि। तान्त्रिको ज्ञातसिद्धान्तः सत्री गृहपतिः समौ। लिपिकारोऽक्षरचणोऽक्षरचुञ्चुश्च ले

खकः ॥ मलानन्धामणिर्नस्व लम्बनेनीलवञ्जनी। लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ। स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणी ॥ अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि। स्वा

म्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च। राज्याङ्गानि प्रकृतयः पौराणां श्रेणयो पि च। सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः। षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः ॥ क्ष

यः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनां। स प्रतापः प्रभावश्च यत्तेजः कोशदण्ड जं। भेदो दण्डः साम दानमित्युपायचतुष्टयं। साहसन्तु दमो दण्डः साम सान्त्वमथो समौ। भेदोपजा

पावुपधा धर्माद्यैर्यत्परीक्षणं। पञ्च त्रिष्वषडक्षीणो यस्तृतीयाद्यगोचर ः। विविक्तविजनच्छन्ननिःशलाकास्तथा रहः। रहश्चोपांशु चालिङ्गे रहस्यं तद्भवे त्रिषु। समौ विस्रम्भ

विश्वासौ भ्रेषो भ्रंशो यथोचितात्। अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसं। युक्त मौपयिकं लभ्यं भजमानाभिनीतवत् ॥ न्याय्यं च त्रिषु षट् सम्प्रधारणा तु समर्थनं। अववादस्तु निर्देशो

निदेशः शासनञ्च सः ॥ शिष्टिश्चाज्ञा च संस्था तु मर्यादा धारणा स्थितिः ॥ आगोऽपराधो मन्तुश्च समे तूद्दानबन्धने। द्विपाद्यो द्विगुणो दण्डो भागधेयः करो बलिः। घट्टादिदेयं शुल्कोऽस्त्री प्राभ

था

स्तुप्रदेशनं। उपायनमुपग्राह्यमुपहारस्तथोपदाः॥ यौतकादि तु यद्देयं सुदायो हरणं च तत्। तत्कालस्तु तदात्वं स्यादुत्तरः काल आयतिः। सांदृष्टिकं फलं सद्य उदर्कः फलमुत्तरं।
अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजं। महीभुजामहिभयं स्वपक्षप्रभवं भयं। प्रक्रिया त्वधिकारः स्याच्चामरं तु प्रकीर्णकं। नृपासनं यत्तद्भद्रासनं सिंहासनं तु तत्। हैमं छ
त्रमातपत्रं राज्ञस्तु नृपलक्ष्म तत्॥ भद्रकुम्भः पूर्णकुम्भो भृङ्गारः कनकालुका। निवेशः शिविरं षण्ढे सज्जनं तूपरक्षणं॥ हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयं। दन्ती दन्ता
वलो हस्ती द्विरदोऽनेकपो द्विपः। मतङ्गजो गजो नागः कुञ्जरो वारणः करी। इभः स्तम्बेरमः पद्मी यूथनाथस्तु यूथपः। मदोत्कटो मदकलः कलभः करिशावकः। प्रभि
न्नो गर्जितो मत्तः समावुद्वान्तनिर्मदौ। हास्तिकं गजता वृन्दे करिणी धेनुका वशा। गण्डः कटो मदो दानं वमथुः करशीकरः॥ कुम्भौ तु पिण्डौ शिरसस्तयोर्मध्ये विदुः पुमान्। अव
ग्रहो ललाटं स्यादीषिका त्वक्षिकूटकं। अपाङ्गदेशो निर्याणं कर्णमूलं तु चूलिका। अधःकुम्भस्य वाहित्थं प्रतिमानमधोऽस्य यत्। आसनं स्कन्धदेशः स्यात् पद्मकं बिन्दुजालकं। पक्षभाग ३४

ः पार्श्वभागो दन्तभागस्तु योऽग्रतः। द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे क्रमात्॥ तोत्रं वेणुकमालानं बन्धस्तम्भेऽथ शृङ्खले। अन्दुको निगडोऽस्त्री स्यादङ्कुशोऽस्त्री सृणिः स्त्रियां। दूष्या क
क्ष्या वरत्रा स्यात्कल्पना सज्जना समे॥ प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः। वीतं त्वसारं हस्त्यश्वं वारी तु गजबन्धनी॥ घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः॥
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः। आजानेयाः कुलीनाः स्युर्विनीताः साधुवाहिनः। वनायुजाः पारसीकाः काम्बोजा बाह्लिका हयाः। ययुरश्वोऽश्वमेधीयो जवनस्तु
जवाधिकः। पृष्ठ्यः स्थौरी सितः कर्को रथ्यो वोढा रथस्य यः। बालः किशोरो वाम्यश्वा वडवा वाडवं गणे। त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते। कश्यं तु मध्यमश्वानां
हेषा ह्रेषा च निस्वनः। निगालस्तु गलोद्देशो वृन्दे त्वश्वीयमाश्ववत्॥ आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतं। गतयोऽमूः पञ्च धारा घोणा तु प्रोथमस्त्रियां। कविका तु खली
नोऽस्त्री शफं क्लीबे खुरः पुमान्। पुच्छोऽस्त्री लूमलाङ्गूले बालहस्तश्च बालधिः। त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि॥ याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः। असौ पुष्यरथश्चक्रय

नं तु समराय यत्॥ कर्णीरथः प्रवहणं डयनं च समं त्रयं। क्लीबानः शकटोऽस्त्री स्यात् गन्त्री कम्बलवाह्यकं। शिबिका याप्ययानं स्यात् दोलाप्रेंखादिकास्त्रियां। उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृ
ते रथे॥ पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली। रथे काम्बलवास्त्राद्याः कम्बलादिभिरावृते। त्रिषु द्वैपादयो रथ्या रथकट्या रथव्रजे। धूः स्त्री क्लीबे यानमुखं स्याद्रथा
ङ्गमपस्करः। चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमान्। पिण्डिका नाभिरक्षाग्रकीलके तु द्वयोरणिः। रथगुप्तिर्वरूथो ना कूबरस्तु युगन्धरः। अनुकर्षो दार्वधःस्थं
नृ। प्रासङ्गो ना युगाद्युगः। सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणं। परंपरावाहनं यत्तद्वैनीतकमस्त्रियां॥ आधोरणा हस्तिपका हस्त्यारोहा निषादिनः। नियन्ता प्राजि ३३
ता यन्ता सूतः क्षत्ता च सारथिः। सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः। रथिनः स्यन्दनारोहा अश्वारोहास्तु सादिनः। भटा योद्धाश्च योद्धारः सेनारक्षास्तु
सैनिकाः। सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते॥ बलिनो ये सहस्रेण साहस्रास्ते सहस्रिणः। परिधिस्थः परिचरः सेनानीर्वाहिनीपतिः। कञ्चुको वारबाणोऽस्त्री यत्तु मध्ये स

कंचुकाः। बध्नन्ति तत्सारसनमधिकांगोऽथ शीर्षकं। शीर्षण्यं च शिरस्त्रेऽथ तनुत्रं वर्मदंशनं। उरश्छदः कंकटको जगरः कवचोऽस्त्रियां। आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत्।
सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकंकटः। त्रिष्वामुक्तादयो वर्मभृतां कावचिकं गणे॥ पदातिपत्तिपदगपादातिकपदाजयः। पद्गश्च पदिकश्चाथ पादातं पत्तिसं
हतिः॥ शस्त्राजीवकाण्डपृष्ठायुधीयायुधिकाः समाः। कृतहस्तः सुप्रयोगविशिखः कृतपुंखवत्॥ अपराद्धपृषत्कोऽसौ लक्ष्याच्च्युतसायकः। धन्वी धनु
ष्मान्धानुष्को निषङ्ग्यस्त्री धनुर्द्धरः। स्यात्काण्डवांस्तु काण्डीरः शाक्तिकः शक्तिहेतिकः। याष्टीकः पारश्वधिको यष्टिपरशुहेतिकौ। नैस्त्रिंशिकोऽसिहेतिः स्यात्
समौ प्रासिककौन्तिकौ। चर्मी फलकपाणिः स्यात् पताका वैजयन्तिका। अनुप्लवः सहायश्चानुचरोऽभिसरः समाः। पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः॥
पुरोगमः पुरोगामी। मन्दगामी तु मन्थरः॥ जंघालोऽतिजवस्तुल्यौ जंघाकरिकजांघिकौ। तरस्वी त्वरितो वेगी प्रजवी जवनो जवः। जय्यो यः शक्यते जेतुं जेयो जेतव्यमात्रके॥

जैत्रस्तु जेता यो गच्छत्यलं विद्विषतः प्रति॥ सोभ्यमित्रोऽभ्यमित्रीयो ह्यभ्यमित्रीणवत्यपि। ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जोतिशयान्वितः। स्यादुरस्वानुरसिला रथिको रथिनो रथी। का
मङ्गाम्यनुकामीनो ह्यत्यन्तीनस्तथा भृशङ्गः॥ शूरो वीरश्च विक्रान्तो जेता जिष्णुश्च जित्वरः। सांयुगीनो रणे साधुः शस्त्राजीवायुधीयकाः। ध्वजिनी वाहिनी सेना पृतनानी
किनी चमूः। वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्॥ व्यूहस्तु बलविन्यासो भेदा दण्डादयो युधि। प्रत्यासारो व्यूहपार्ष्णिः सैन्यपृष्ठे प्रतिग्रहः। एकेभैकरथास्त्र्य
वि श्वाः पत्तिः पञ्चपदातिका। पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरं। सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः। अनीकिनी दशानीकिन्यक्षौहिण्यथ सम्पदि॥ ३६
सम्पत्तिः श्रीश्च लक्ष्मीश्च विपत्त्यां विपदापदौ। आयुधन्तु प्रहरणं शस्त्रमस्त्रमथास्त्रियां। धनुश्चापौ धन्वशरासनकोदण्डकार्मुकं। इष्वासोऽप्यथ कर्णस्य कालपृष्ठं शरासनं। कपि
ध्वजस्य गाण्डीवगाण्डिवौ पुन्नपुंसकौ। कोटिरस्याटनी गोधे तले ज्याघातवारणे। लस्तकस्तु धनुर्मध्यं मौर्वी ज्या शिञ्जिनी गुणः। स्यात्प्रत्यालीढमालीढमित्यादि स्थानपञ्चकं। लक्षं लक्ष्यं शरव्य

ञ्च शराभ्यास उपासनं॥ पृषत्कबाणविशिखा अजिह्मगखगाशुगाः। कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः॥ प्रक्ष्वेडनास्तु नाराचाः पक्षो वाजस्त्रिषूत्तरे। निरस्तः प्रहिते बाणे विषाक्ते दि
ग्धलिप्तकौ। तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः। तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः। कौक्षेयको मण्डलाग्रः करवालः कृपाणवत्। त्सरुः खड्गादिमुष्टौ स्यान्मेखला तन्निबन्ध
नं॥ फलकोऽस्त्री फलं चर्म संग्राहो मुष्टिरस्य यः। द्रुघणो मुद्गरघनौ स्यादीली करवालिका॥ भिन्दिपालः सृगस्तुल्यौ परिघः परिघातिनः। द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः।
स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका॥ वा पुंसि शल्यं शङ्कुर्ना सर्वला तोमरोऽस्त्रियां। प्रासस्तु कुन्तः कोणस्तु स्त्रियः पाल्यश्रिकोटयः। सर्वाभिसारः सर्वौघः सर्वसंनहनार्थकः। लोहा
भिसारोऽस्त्रभृतां राज्ञां नीराजनाविधिः। यत्सेनयाभिगमनमरौ तदभिषेणनं। यात्रा व्रज्याभिनिर्याणं प्रस्थानं गमनं गमः। स्यादासारः प्रसरणं प्रचक्रं चलितार्थकं। अहितान्प्रत्यभीतस्य
रणे यानमभिक्रमः॥ वैतालिका बोधकराश्चाक्रिका घाण्टिकार्थकाः। स्युर्मागधास्तु मगधा बन्दिनः स्तुतिपाठकाः। संशप्तकास्तु समयात्संग्रामादनिवर्तिनः। रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रजः॥

चूर्ण्णे क्षोदः समुत्पिञ्जपिञ्जलौ भृशमाकुले ॥ पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रियां । सा वीराशंसनं युद्धभूमिर्य्यातिभयप्रदा । अहंपूर्व्वमहंपूर्व्वमित्यहंपूर्व्विका स्त्रियां । आहोपुरुषिका
दर्प्पाद्या स्यात्संभावनात्मनि । अहमहमिका तु सा स्यात्परस्परं यो भवत्यहंकारः । द्रविणं तरःसहो बलशौर्य्याणि स्थाम शुष्मञ्च । शक्तिः पराक्रमः प्राणो विक्रमस्त्वतिशक्तिता । वीरपानन्तु यत्पानं वृ
त्ते भाविनि वा रणे । युद्धमायोधनं जन्यं प्रधनं प्रविदारणं । मृधमास्कन्दनं संख्यं समीकं साम्परायिकं । अस्त्रियां समरानीकरणाः कलहविग्रहौ । संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः ।
ख्र अभ्यामर्द्दसमाघातसंग्रामाभ्यागमाहवाः । समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः । नियुद्धं बाहुयुद्धेऽथ तुमुलं रणसंकुलं । क्ष्वेडा तु सिंहनादः स्यात्करिणां घटना घटा । क्रन्दनं योधसं ३१
रावो बृंहितं करिगर्ज्जितं । विस्फारो धनुषः स्वानः पटहाडम्बरौ समौ ॥ प्रसभन्तु बलात्कारो हठोऽथ स्खलितं छलं । अजन्यं क्लीबमुत्पात उपसर्गः समन्त्रयं ॥ मूर्च्छा तु कश्मलं मोहोऽप्य
वमर्द्दस्तु पीडनं । अभ्यवस्कन्दनन्त्वभ्यासादनं विजयो जयः ॥ वैरशुद्धिः प्रतीकारो वैरनिर्य्यातनञ्च सा ॥ प्रद्रावोद्द्रावसन्द्राव सन्दावा विद्रवो द्रवः । अपक्रमोऽपयानञ्च रणे भङ्गः पराजयः । पराजितपराभू

तौ त्रिषु नष्टतिरोहितौ ॥ प्रमापणं निबर्हणं निकारणं विशारणं । प्रवासनं परासनं निषूदनं निहिंसनं । निर्व्वासनं संज्ञपनं निर्ग्रन्थनमपासनं । निस्तर्हणं निहननं क्षणनं परिवर्ज्जनं । निर्व्वापणं
विशसनं मारणं प्रतिघातनं ॥ उद्वासनप्रमथनक्रथनोज्जासनानि च । आलम्भपिञ्जविशरघातोन्माथवधा अपि । स्यात्पञ्चता कालधर्म्मो दिष्टान्तः प्रलयोऽत्ययः ॥ अन्तो नाशो द्वयोर्मृ
त्युर्म्मरणं निधनोऽस्त्रियां ॥ परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः । मृतप्रमीतौ त्रिष्वेते चिता चित्या चितिः स्त्रियां । कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरं । श्मशानं स्यात्पि
तृवनं कुणपः शवमस्त्रियां ॥ प्रग्रहोपग्रहौ बन्द्यां कारा स्याद्बन्धनालये । पुंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणं । आयुर्ज्जीवितकालो ना जीवातुर्ज्जीवनौषधं ॥ इत्यमर
सिंहकृतौ नामलिङ्गानुशासने क्षत्रियवर्गः ॥ ॥ ऊरव्या ऊरुजा अर्य्या वैश्या भूमिस्पृशो विशः । आजीवो जीविका वार्त्ता वृत्तिर्व्वर्त्तनजीवने । स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति
वृत्तयः ॥ सेवा श्ववृत्तिरनृतं कृषिरुञ्छशिलं त्वृतं । द्वे याचितायाचितयोर्य्यथासंख्यं मृतामृते ॥ सत्यानृतं वणिग्भावः स्यादृणं पर्य्युदञ्चनं । उद्धारोऽर्थप्रयोगस्तु कुसीदं वृद्धिजीविका । याच्ञयाप्तं

याचितकं निमयादापमित्यकं । उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ॥ कुसीदिको वार्द्धुषिको वृद्ध्याजीवश्च वार्द्धुषिः । क्षेत्राजीवः कर्षकश्च कृषकश्च कृषीवलः । क्षेत्रं व्रैहेयशाले-
यं व्रीहिशाल्युद्भवोचितं ॥ यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि यत् ॥ तिल्यं तैली-नवन्माषोमाणुभङ्गा द्विरूपता । मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्षमं । बीजाकृतं तूप्तकृष्टे सीत्य-
म म कृष्टञ्च हल्यवत् ॥ त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि ॥ द्विगुणाकृ-ते तु सर्वं पूर्वं शम्बाकृतमपीह ॥ द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः ॥ खारीवापस्तु खारीक ३८
उत्तमर्णादयस्त्रिषु । पुंनपुंसकयोर्वप्रः केदारः क्षेत्रमस्य तु । केदारकं स्यात् कैदा-र्यं क्षेत्रं कैदारिकं गणे । लोष्टानि लेष्टवः पुंसि कोटिशो लोष्टभेदनः । प्राजनं तोदनं तोत्रं खनित्रम
अवदारणे ॥ दात्रं लवित्रमाबन्धो योक्त्रं योत्रमथो फलं । निरीशं कुटकं फालः कृषको लाङ्गलं हलं । गोदारणञ्च सीरोथ शम्या स्त्री युगकीलकः । ईषा लाङ्गलदण्डः स्यात् सीता लाङ्
गलपद्धतिः ॥ पुंसि मेधिः खले दारु न्यस्तं यत्पशुबन्धने । आशुर्व्रीहिः पाटलः स्याच्छितशूकयवौ समौ । तोक्मस्तु तत्र हरिते कलायस्तु सतीनकः । हरेणुरेणुकौ चास्मिन् कोरदूषस्तु कोद्रवः ॥ मङ्गल्य

को मसूरोथ मकुष्ठकमयुष्ठकौ । वनमुद्गे सर्षपे तु द्वौ तन्तुभकदम्बकौ । सिद्धार्थस्त्वेष धवलो । गोधूमः सुमनः समौ । स्याद्यावकस्तु कुल्माषः चणको हरिमन्थकः । द्वौ तिले तिलपेजश्च तिलपि-
ञ्जश्च निष्फले ॥ क्षवः क्षुताभिजननं राजिका कृष्णिकासुरी । स्त्रियौ कङ्गुप्रि-यङ्गू द्वे अतसी स्यादुमा क्षुमा । मातुलानी तु भङ्गायां व्रीहिभेदस्त्वणुः पुमान् । किंशारुः सस्यशूकं
स्यात् कणिशं सस्यमञ्जरी । धान्यं व्रीहिः स्तम्बकरिः स्तम्बो गुच्छस्तृणादिनः । नाडी ना-लञ्च काण्डोस्य पलालोऽस्त्री स निष्फलः । कडङ्गरो बुसं क्लीबे धान्यत्वचि तुषः पुमान् । शूकोऽस्त्री श्ल-
क्ष्णतीक्ष्णाग्रे शमी शिम्बा त्रिषूत्तरे ॥ ऋद्धमावसितं धान्यं पूतन्तु बहुलीकृतं ॥ माषादयः शमीधान्ये शूकधान्ये यवादयः । शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी ॥ तृणधा-
न्यानि नीवाराः स्त्री गवेधुर्गवेधुका । अयोग्रं मुसलोऽस्त्री स्यादुदूखलमुलूखलं । प्रस्फोटनं शूर्पमस्त्री चालनी तितउः पुमान् । स्यूतप्रसेवौ कण्डोलपिटौ कटकिलिञ्जकौ । समानौ र-
सवत्यान्तु पाकस्थानमहानसे । पौरोगवस्तदध्यक्षः सूपकारास्तु बल्लवाः । आरालिका आन्धसिकाः सूदा औदनिका गुणाः । आपूपिकः कान्दविका भक्ष्यकारा इमे त्रिषु । अश्मन्तमुद्धानमधि-

यणी चुल्लिरन्तिका । अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि । हसन्यप्यथ न स्त्री स्यादङ्गारो ऽलातमुल्मुकं । क्लीबे ऽम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियां । अलिञ्जरः स्यान्मणिकः कर्कर्यालुर्गलन्ति-
का । पिठरः स्थाल्युखा कुण्डं कलशस्तु त्रिषु द्वयोः । घटः कुटनिपावस्त्री शरावो वर्द्धमानकः । ऋजीषं पिष्टपचनं कंसो ऽस्त्री पानभाजनं । कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान् ।
सर्वमावपनं भाण्डं पात्रामत्रं च भाजनं । दर्विः कम्बिः खजाका च स्यात्तर्दूर्दारुहस्तकः । अस्त्री शाकं हरितकं शिग्रुरस्य तु नाडिका । कलम्बश्च कडम्बश्च वेस-
वार उपस्करः । तिन्तिडीकं च चुक्रं च वृक्षाम्लमथ वेल्लजं । मरीचं कोलकं कृष्णमूषणं धर्मपत्तनं । जीरको जरणो ऽजाजी कणा कृष्णे तु जीरके । सुषवी कारवी पृथ्वी पृथुः का- ३९
लोपकुञ्चिका । आर्द्रकं शृङ्गवेरं स्यादथ छत्रा वितुन्नकं । कुस्तुम्बुरु च धान्याकमथ शुण्ठी महौषधं । स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजं । आरनालकसौवीरकुल्माषाभिषुतानि
च । अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्जिके ॥ सहस्रवेधि जतुकं बाह्लीकं हिङ्गु रामठं ४० ॥ तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः । निशाख्या काञ्चनी पीता हरिद्रा

वरवर्णिनी । सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् ॥ सैन्धवो ऽस्त्री शीतशिवं माणिमन्थं च सिन्धुजे । रौमकं वसुकं पाक्यं बिडं च कृतके द्वयं ॥ सौवर्चले ऽक्षरुचकं तिलकं तत्र मेचके । मत्स-
ण्डी फाणितं खण्डविकारे शर्करा सिता । कूर्चिका क्षीरविकृतिः स्याद्रसाला तु मार्जिता । स्यात्तेमनं तु निष्ठानं त्रिलिङ्गा वासितावधेः । शूलाकृतं भटित्रं च शूल्यमुख्यं तु पैठरं ।
प्रणीतमुपसम्पन्नं प्रयस्तं स्यात्सुसंस्कृतं ॥ स्यात्पिच्छिलं तु विजिलं संमृष्टं शोधितं समे । चिक्कणं मसृणं स्निग्धं तुल्ये भावितवासिते ॥ आपक्वं पौलिरभ्यूषो लाजाः पुंभूम्नि चाक्षताः ।
पृथुकः स्याच्चिपिटको धाना भृष्टयवे स्त्रियः । पूपो ऽपूपः पिष्टकः स्यात्करम्भो दधिसक्तवः ॥ भिस्सा स्त्री भक्तमन्धो ऽन्नमोदनो ऽस्त्री स दीदिविः । भिस्सटा दग्धिका सर्वरसाग्रे मण्डमस्त्रि-
यां । मासराचामनिस्रावा मण्डे भक्तसमुद्भवे ४७ ॥ यवागूरुष्णिका श्राणा विलेपी तरला च सा । गव्यं त्रिषु गवां सर्वं गोविड्गोमयमस्त्रियां ॥ तत्तु शुष्कं करीषो ऽस्त्री दुग्धं क्षीरं
पयः समं ॥ पयस्यमाज्यदध्यादि द्रप्स्यं दधि घनेतरत् ॥ घृतमाज्यं हविः सर्पिर्नवनीतं नवोद्धृतं ॥ तत्तु हैयङ्गवीनं यद्ध्योगोदोहोद्भवं घृतं ॥ दण्डाहतं कालशेयमरिष्टमपि गोरसः । तक्र

ना हृदश्विन्मथितं पादाम्बर्द्धाम्बु निर्ज्जलं ॥ मण्डं दधिभवं मस्तु पीयूषोऽभिनवं पयः ॥ अशनाया बुभुक्षा क्षुद्ग्रासस्तु कवलार्थकः ॥ सपीतिः स्त्री तुल्यपानं सग्धिः स्त्री सहभोजनं ॥ उदन्या तु पिपा-
सा तृट् तर्षो जग्धिस्तु भोजनं ॥ जेमनं लेप आहारो निघासो न्याद इत्यपि । सौहित्यं तर्पणं तृप्तिः फेला भुक्तसमुज्झितं ॥ कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितं ॥ गोपे गो-
पालगोसंख्यगोधुगाभीरवल्लवाः ॥ गोमहिष्यादिकं पादबन्धनं गो गवीश्वरे ॥ गोमान्गोमी गोकुलन्तु गोधनं स्याद्गवां व्रजः ॥ उक्षा भद्रो बलीवर्द्द ऋषभो वृषभो वृषः ॥ ४०
अनड्वान्सौरभेयो गौ उक्ष्णां संहतिरौक्षकं ॥ गव्या गोत्रा गवां वत्सधेन्वोर्वात्सकधे-नुके ॥ वृषो महान्महोक्षः स्याद्वृद्धोक्षस्तु जरद्गवः ॥ उत्पन्न उक्षा जातोक्षो दम्यवत्सतरौ समौ ॥
आर्षभ्यः षण्डतायोग्यः षण्डो गोपतिरिट्चरः ॥ स्कन्धदेशस्य वहः सास्ना तु गलकम्बलः ॥ स्यान्नस्तितस्तु नस्योतः प्रष्ठवाट् युगपार्श्वगः ॥ युगादीनान्तु वोढारो युग्यप्रास-
ङ्गिकशाकटाः ॥ खनति तेन तद्वोढास्येदं हालिकसैरिकौ ॥ धूर्वहे धुर्यधौरेयधुरीणाः सधुरन्धराः ॥ उभावेकधुरीणैकधुरावेकधुरावहे । स तु सर्व्वधुरीणः स्याद्यो वै सर्व्वधुराव

माहेयी सौरभेयी गौ उस्रा माता च शृङ्गिणी । अर्ज्जुन्यघ्न्या रोहिणी स्यादुत्तमा गोषु नैचिकी । वर्णादिभेदात्संज्ञाः स्युः शवलीधवलादयः । द्विहायनी द्विवर्षा गौ एकाब्दा त्वेकहायनी । वशा वन्ध्याव-
तोका तु स्रवद्गर्भाथ सन्धिनी । आक्रान्ता वृषभेणाथ वेहद्गर्भोपघातिनी । काल्योपसर्या प्रजने प्रष्ठौही बालगर्भिणी । स्यादचण्डी तु सुकरा बहुसूतिः परेष्टुका । चिरसूता वष्कय-
णी धेनुः स्यान्नवसूतिका । सुव्रता सुखसन्दोह्या पीनोध्नी पीवरस्तनी । द्रोणक्षीरा द्रोणदुग्धा धेनुष्या बन्धकस्थिता । समांसमीना सा यैव प्रतिवर्षं प्रसूयते । ऊधस्तु क्लीवमापीनं स-
मौ शिवककीलकौ । न पुंसि दाम सन्दानं पशुरज्जुस्तु दामनी । वैशाखमन्थमन्थानमन्थाना मन्थदण्डके । कुठरो दण्डविष्कम्भो मन्थनी गर्गरी सम । उष्ट्रे क्रमेलकमयमहाङ्गाः करभ-
कः शिशुः करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः । अजा छागी शुभच्छागबस्तच्छगलका अजे ॥ मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडकाः ॥ उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकं ।
चक्रीवन्तस्तु वालेया रासभा गर्द्दभाः खराः । वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् ॥ पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः । विक्रेता स्याद्विक्रयिकः क्रायिकक्रयिकौ समौ ।

विक्रमास्याद्धिक्वाथितः क्वथितः क्वाथितः समौ ॥ वाणिज्यं तु वणिज्या स्यान्मूल्यं वस्नोऽप्यवक्रयः। नीवी परिपणं मूल धनं लाभोऽधिकं फलं। परिदानं परीवर्तो नैमेयनियमावपि। पु
मानुपाधिर्न्यासः प्रतिदानं तदर्पणं ॥ क्रये प्रसारितं क्रय्यं क्रेयं क्रेतव्यमात्रके। विक्रेयं पणितव्यं च पण्यं क्रय्यादयस्त्रिषु। क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रि
यां। विपणो विक्रयः संख्या संख्येये ह्यादश त्रिषु। विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः। संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः। पङ्क्तेः शतसहस्रा ४१
